## अध्याय :- ५५ chapter-55

सूत उवाच[१] ।।
इति बाभ्रव्यवचनमाकर्ण्य कुरु नन्दनः[२] ।।
प्राणमन्नारदं[३] भक्तत्या विस्मितः पुलकान्वितः ।। १

प्रशस्य च चिरं कालं पुनर्नारदम ब्रवीत् ।। २

गुप्तक्षेत्रस्य माहात्म्यं श्रृण्वानस्त्वन्मुखान्मुने ।।
तुप्तिं नैवाधिगच्छामि भूयस्तद्वक्तुमर्हसि ।। ३

नारद उवाच ।।[४]
महालिंगस्य वक्ष्यामि महिमानं कुरुद्वह ।।
गौतमेश्वर लिंगस्य सावधानः श्रृणुष्व तत् ।। ४

अक्षपादो महायोगी गौतमाख्यो भवेन्मुनिः ।।
गोदावरीसमानेता अहल्यायाः पतिः प्रभुः ।। ५

गुप्तक्षेत्रस्य माहात्म्यं स च ज्ञात्वा महोत्तमम् ।।
योग संसाधनं कुर्वन्नत्र तेपे तपो महत् ।। ६

योग सिद्धिं ततः प्राप्य गौतमेन महात्मना।।
अत्र संस्थापितं लिंगं गौतमेश्वर संज्ञया ।। ७

---

१ अ. सुत० ।। ब. सुत उ० ।।
२ ब. नंदन
३ ब. प्रणाम्य
४ अ. श्री नारद ।। ब. श्री नारद उ० ।।

संस्थाप्यैतन्महालिंगं चन्दनेन विलिप्य च ।।
संपूज्य पुष्पैर्विविधैर्गुग्गुलं दाहयेत्पुरः ।। ८

अर्जुन उवाच[1] ।।
योगस्वरूपमिच्छामि श्रोतुं नारद तत्त्वतः ।।
योगं सर्वे प्रशंसंति यतः सर्वोत्तमोमम् ।। ९

नारद उवाच ।।[2]
समासात्तव वक्ष्यामि योगतत्त्वं कुरूद्वह ।।
श्रवणादपि नैर्मल्यं यस्य स्यात्सेवनात्किमु ।। १०

चित्तवृत्ति निरोधाख्यं योगतत्त्वं प्रकीर्त्यते ।।
तदष्टांग प्रकारेण साधयंतीह योगिनः ।। ११

यमश्च नियमश्चैव प्राणायामस्तृतीयकः ।।
प्रत्याहारो धारणा च ध्येयं ध्यानं च सप्तमम् ।। १२

समाधिरिति चाष्टांगो योगः संपरिकीर्तितः ।।
प्रत्येकं लक्षणं[3] तेषामष्टानां श्रृणु पांडव ।। १३

अनुक्रमान्नरो येषां साधनाद्योगमश्नुते ।।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।। १४

---

१ अ. प्रतौ 'उवाच' नास्ति ।
२ अ. श्री नारद ।। ब. श्री नारद उ० ।।
३ 'तेषामष्टानां श्रृणु पांडव' अ. प्रतौ नास्ति

*१ एते पंच यमाः प्रोक्ताः शृण्वेषामपि लक्षणम् ।।
आत्मवत्सर्व भूतेषु यो हिताय प्रवर्तते ।। १५

अहिंसैषा समाख्याता वेदसंविहिता च या ।।
दृष्टं श्रुतं चानुमितं स्वानुभूतं यथार्थतः ।। १६

कथनं सत्यमित्युक्तं परपीडा विवर्जितम् ।।
अनादानं परस्वानामापद्यपि कथंचन ।। १७

मनसा कर्मणा वाचा तदस्तेयं प्रकीर्तितम् ।।
अमैथुनं यतीनां च मनोवाक्काय कर्मभिः ।। १८

ऋतौ[२] स्वदारगमनं गेहिनां ब्रह्मचर्यता ।।
यतीनां सर्व संन्यासो मनोवाक्काय कर्मणा ।। १९

गृहस्थानां च मनसा स्मृत एषो परिग्रहः ।।
एते यमास्तव प्रोक्ताः पंचैव नियमांछृणु ।। २०

शौचं तुष्टिस्तपश्चैव जपो भक्तिर्गुरोस्तथा ।।
एतेषामपि पंचानां पृथक्संशृणु लक्षणम् ।। २१

---

*१ The folio No. 317 of M.S.S.-A is missing so slokas from 15 to 37 are missing.

(एते पंच यमाः....... लोभ .... कृत्स्तज्ञ)

२ ब. रतौ

ब्राह्यमाभ्यंतरं चैव द्विविधं शौचमुच्यते ।।
बाह्यं तु[1] मृज्जलैः प्रोक्तमांतरं शुद्ध मानसम् ।। २२

न्याये नागतया वृत्या भिक्षया वर्तयामि च ।।
संतोषो यस्य सततं सा तुष्टिरिति चोच्यते ।। २३

चांद्रायणादीनि पुनस्तपांसि विहितानि च ।।
आहारलाघव परः कुर्यात्तप उच्यते ।। २४

स्वाध्यायस्तु जपः प्रोक्तः प्रणवाभ्य सनादिकः ।।
शिवे[2] ज्ञाने गुरौ भक्तिर्गुरु भक्तिरिति स्मृता ।। २५

एवं संसाध्य नियमान्संयमांश्च विचक्षणः ।।
प्राणायामाय संदध्यान्नान्यथा योगसाधकः ।। २६

यतो शुचि शरीरस्य वायुकोपो महान्भवेत् ।।
वायुकोपात्कुष्ठता च जडत्वादीनुपाश्नुते ।। २७

तस्माद्विचक्षणः शुद्धं कृत्वा देहं यतेत्परम् ।।
प्राणायामस्य वक्ष्यामि लक्षणं शृणु पांडव ।। २८

---

१ ब. प्रतौ 'तु' नास्ति ।
२ ब. शिव

प्राणापान निरोधश्च प्राणायामः प्रकीर्तितः ।।
लघुमध्योत्तरीयाख्यः स च धीरैस्त्रिधोदितः ।। २९

लघुर्द्वादश मात्रस्तु मात्रानिमिष उन्मिषः ।।
द्विगुणो मध्यमश्चोक्तस्त्रिगुणश्चोत्तमः स्मृतः ।। ३०

प्रथमेन जयेत्स्वेदं मध्यमेन तु वेपथुम् ।।
विषादं च तृतीयेन[1] जये[2]द्दोषाननुक्रमात् ।। ३१

पद्ममाख्यमासनं कृत्वा रेचकं पूरकं तथा ।।
कुंभकं च सुखासीनः प्राणायामं त्रिधाऽभ्यसेत् ।। ३२

प्राणानामुपसंरोधात्प्राणायाम इति स्मृतः ।।
यथा पर्वतधातूनां ध्मातानां दह्यते मलः ।। ३३

तथेंद्रियकृतो दोषः प्राणायामेन दह्यते ।।
गोशतं कापिलं दत्त्वा यत्फलं तत्फलं भवेत् ।। ३४

प्राणायामेन योगज्ञस्तस्मात्प्राणं सदा यमेत् ।।
प्राणायामेन सिद्ध्यन्ति दिव्याः शान्त्यादयः क्रमात् ।। ३५

---

१ ब. तृतीये
२ ब. जयी

शांतिः प्रशान्तिर्दीप्तिश्च प्रसादश्च यथाक्रमम् ।।
सहजानां तु कामानां पापानां च प्रवर्तताम् ।। ३६

वासना शांतिरित्याख्यः प्रथमो जायते गुणः ।।
लोभमोहात्मकान्दोषान्निराकृत्यैव कृत्स्नशः ।। ३७

तपसां च यदा प्राप्तिः सा शांतिरितिचोच्यते ।।
सर्वेन्द्रियप्रसादश्च बुद्धेर्वै मरुतामपि ।। ३८

प्रसाद इति स प्रोक्तः [१]प्राप्यमेवं चतुष्टयम् ।।
एवंफलं सदा[२] योगी प्राणायामं समभ्यसेत् ।। ३९

मृदुत्वं सेव्यमानास्तु सिंहशार्दुलकुंजराः ।।
यथा यान्ति [३]तथा प्राणो[४] वश्यो[५] भवति साधितः[६] ।। ४०

प्राणायामस्त्वयं प्रोक्तः प्रत्याहारं ततः शृणु ।।
विषयेषु प्रवृत्तस्य चेतसो विनिवर्त्तनम् ।। ४१

प्रत्याहारं विनिर्दिष्टं तस्य संयमन हि यत् ।।
प्रत्याहारस्त्वयं प्रोक्तो धारणालक्षणं शृणु ।। ४२

---

१ ब. प्राथमे च

२ ब. सदाः

३,४,५ "तथा प्राणोवश्यो" अ. प्रतौ न पठयते ।

६ ब. साधनिः

यथा तौयार्थिनऽस्तोयं पत्र नालादिभिः शनैः ।।
आपिबेयुस्तथा वायुं योगी नयति साधितम् ।। ४३

प्रागूनाभ्यां त्ददये वायुरथ तालौ भ्रुवोऽन्तरे ।।
चतुर्दले षड्दशे च द्वादशे षोडशद्विके ।। ४४

आकुंचने नैव मुर्द्धवमुन्नीय पवनं शनैः ।।
मूर्ध्नि मूर्धनि ब्रह्मरन्ध्रे तं प्राणं संधारयेत्कृती ।। ४५

प्राणायामा दशऽद्वौच धारणाख्या प्रकीर्त्यति[1] ।।
दशैता धारणाः[2] स्थाप्य प्राप्नोत्यक्षर साम्यताम् ।। ४६

धारणास्थस्य यद्ध्येयं तस्य त्वं शृणु लक्षणम् ।।
ध्येयं[3] बहुविधं पार्थ यस्यांतो नोपलभ्यते ।। ४७

केचिच्छिवं हरिं केचित्केचित्सूर्यं विधिं परे ।।
केचिद्देवीं महद्भूतामुत ध्यायन्ति केचन ।। ४८

तत्र यो यच्च ध्यायेत स च तत्र प्रलीयते ।।
तस्मात्सदा शिवं देवं पंच वक्त्रं हरं स्मरेत् ।। ४९

---

१ अ, ब, प्रकीर्त्तिता
२ ब, धारणा
३ ब, ध्यायं

पद्मासनस्थं तं गौरं बीजपूरकरं स्थितम्[1] ।।
दशहस्तं सुप्रसन्नवदनं ध्यानमास्थितम् ।। ५०

ध्यानस्य च लक्षणं चैतन्निमेषार्धमपि स्फुटम् ।। ५१

न पृथग्जायते ध्येयाद्धारणां यः समास्थितः ।।
एवमेतां दुरारोहां भूमिमास्थाय च योगवित्[2] ।। ५२

न किंचिच्चिंतयेत्पश्चात्समाधिरिति कीर्त्यते ।।
समाधेर्लक्षणं सम्यग्ब्रुवतो मे निशामय ।। ५३

शब्दस्पर्शरसैर्हीनं गंधरूपविवर्जितम् ।।
परं पुरुषं संप्राप्तः समाधिस्थ प्रकीर्तितः ।। ५४

तां तु प्राप्य नरो विघ्नैर्नाभिभूयेतकर्हिचित् ।।
समाधिस्थश्च दुःखेन गुरुणापि न चाल्यते ।। ५५

शंखाद्याः[3] शतशस्तस्य वाद्यन्ते यदि कर्णयोः ।।
भेर्यश्च यदि हन्यंते शब्दं बाह्यं न विंदति ।। ५६

---

१ अ. स्थिरं
२ ब. योगवत्
३ अ. ब. शंखादि

कशाप्रहारभिहता वह्निनदग्ध तनुस्तथा ।।
शीताप्येवस्थितो घोरे स्पर्श ग्राहूयं न विन्दति ।। ५७

रूपे[१] गंधे रसे ब्राह्ये[२] तादृशस्य तु का कथा ।।
दृष्ट्वा य आत्मनात्मानं समाधिं लभते पुनः ।। ५८

तृष्णा वाथ बुभुक्षावा बाधते तं न कर्हिचित् ।। ५९

न स्वर्गे न च पाताले मानुष्ये क्व च तत्सुखम् ।।
समाधिं निश्चलं प्राप्य यत्सुखं विंदन्ति नरः ।। ६०

एवमारूढयोगस्य तस्यापि कुरुनंदन ।।
पंचोपसर्गाः कटुकाः प्रवर्तंते यथा श्रृणु ।। ६१

प्रातिभः श्रावणो[३] दैवो भ्रमावर्तो/थ भीषणाः ।।
प्रतिभा सर्वशास्त्राणां प्रातिभो/यं च सात्त्विकाः ।। ६२

तेन यो मदमादद्याद्योगी शीघ्रं च चेतसः ।।
योजनानां सहस्त्रेभ्यः श्रवणं श्रावणस्तु सः ।। ६३

---

१ अ. रूपै
२ अ. बाहूयै
३ अ. श्रवणो

द्वितीयः सात्त्विकश्चायमस्मान्मत्तो विनश्यति ।।
अष्टौ पश्यति योनीश्च देवानां देव इत्यसौ ।। ६४

अयं च सात्त्विको दोषो मदवदस्मा द्विनश्यति ।।
आवर्त इव तोयस्य[1] जनावर्ते यदाकुलः ।। ६५

आवर्ताख्यस्त्वयं दोषो राजसः स महाभयः[2] ।।
भ्राम्यते[3] यन्निरालम्बं मनो दोषैश्च योगिनः ।। ६६

समस्ताधार विभ्रंशाद्भ्रमाख्यस्तामसो गुणः ।।
एतैर्नाशित योगाश्च सकला देव योनयः ।। ६७

उपसर्गैर्महाघोरै रावर्त्यं ते पुनः पुनः ।।
प्रावृत्य कंबलं शुक्लं योगी तस्मान्मनो मयम् ।। ६८

चिंतयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मनः ।।
आहाराः सात्त्विकाश्चैव संसेव्याः सिद्धिमिच्छता ।। ६९

श्रद्धानेषु दांतेषु श्रोत्रियेषु महात्मसु ।। ७०

---

१ ब. तो तस्य
२ अ. भवः
३ ब. भ्राम्या च

स्वधर्मादिनऽपैतेषु भिक्षा याच्या च योगिना ॥
भैक्षं यवान्नं तक्रं वा पयो यावकमेव वा ॥ ७१

फलमूलं विपक्वं वा कणप्रिण्या कसक्तवः ॥
[1]श्रुता इत्यैत आहारा योगिनां सिद्धिकारकाः ॥ ७२

मृत्युकालं विदित्वा च निमित्तैर्योग साधकः ॥
योगं युंजीत कालस्य वंचनार्थं समाहितः ॥ ७३

निमित्तानि च वक्ष्यामि मृत्युं यो वेत्ति योगवित् ॥
रक्तकृष्णा[2]ऽम्बरधरा गायंती ह सती च यम्[3] ॥ ७४

दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥
नग्नं क्षपणकं स्वप्ने [4]हसमानं [5]प्रदश्य च ॥ ७५

एनं[6] च वीक्ष्य वल्गन्तं तं विद्यान्मृत्युमागतम् ॥
ऋक्षवानरयुग्यस्थो च गायन्यो दक्षिणां दिशम् ॥ ७६

याति मज्जेदधो पंके गोमये वा न जीवति ॥
केशांगारैस्तथा भस्मभुजंगै निर्जलां नदीम् ॥ ७७

---

१ अ॰ ब॰ 'इत्यैत श्रुता' च (व्युत्क्रमे)
२ ब॰ चर्मा
३ अ॰ 'य' ॥
४-५ ब॰ 'प्रसमानं प्रहस्य च' ॥
६ अ॰ ब॰ 'एवं'।

एषामन्यतमैः पूर्णां दृष्ट्वा स्वप्ने न जीवति ।।
करालैर्विकटै रुक्षैः पुरुषैरुद्यतायुधैः ।। ७८

पाषाणैस्ताडितः स्वप्ने सद्यो मृत्युं भजेन्नरः ।।
सूर्योदये यस्य शिवा क्रोशंती याति सम्मुखम्[1] ।। ७९

विपरीतं परीतं वा स सद्यो मृत्युमृच्छति ।।
दीपादिगंधं नो वेत्ति वमत्यग्निं तथा निशि ।। ८०

नात्मानं परनेत्रस्थं वीक्षते न स जीवति ।।
शक्रायुधं चार्धरात्रे दिवा वा ग्रहणं तथा ।। ८१

दृष्ट्वा मन्यते स क्षीणमात्मजीवितमाप्तवान् ।।
नासिका वक्रतामेति कर्णयोर्न्नमनोन्नती ।। ८२

नेत्रं च वामं स्त्रवति[2] यस्य[3] तस्यायुरुद्गतम् ।।
आरक्ततामेति मुखं जिह्वा चाप्यसिता यदा ।। ८३

तदा प्राज्ञो विजानीयादासन्नं मृत्युमात्मनः ।।
उष्ट्ररासभयानेन स्वप्ने यो याति दक्षिणाम्[4] ।। ८४

---

१ अ. सन्मुखं
२ अ. श्रवति
३ ब. तस्य
४ ब. दक्षिणां

दिशं कर्णौ पिधायापि निर्घोषं श्रृणुयान्न च ।।
न स जीवेत्तथा स्वप्ने पतितस्य पिधीयते ।। ८५

द्वारं न चोत्तिष्ठति च शुभ्रा दृष्टिश्च लोहिता ।।
स्वप्नेऽग्निं प्रविश्य न च निष्क्रमते पुनः ।। ८६

जलप्रवेशादपि वा तदंतं तस्य जीवितम्[१] ।।
यश्चाभिहन्यते दुष्टैर्भूतै रात्रावथो दिवा ।। ८७

प्रकृतेर्विकृतेर्वापि तस्यासन्नौ यमांतकौ ।।
देवतानां गुरूणां च पित्रोर्ज्ञानिविदां तथा ।। ८८

निन्दामवज्ञां कुरुते भक्तो भूत्वा न जीवति ।।
एवं दृष्ट्वा निमित्तानि विपरीतानि योगवित् ।। ८९

धारणां सम्यगास्थाय समाधावचलो भवेत् ।।
यदि नेच्छति ते मृत्युं ततो नासौ प्रपद्यते ।। ९०

विमुक्तिमथवा वांछिद्भिसृतेद्ब्रह्ममूर्धनि ।।
संति देहे विमुक्ते च उपसर्गाश्च ये पुनः ।। ९१

---

१ अ. पिवर्तं

यौगिनं समुपायांति[1] शृणु तानपि पांडव ।।
ऐशान्ये राक्षसपुरे यक्षो[2] गन्धर्व[3] एव च ।। ९२

ऐन्द्रे सौम्ये प्रजापत्ये ब्राह्मे चाष्टसु सिद्धयः ।।
भवंति चाष्टौ शृणुताः पार्थिवी या च तैजसी ।। ९३

वायवी व्योमात्मिका चैव मानसाहम्भवा मतिः[4] ।।
प्रत्येकमष्टधाभिन्ना द्विगुणाक्रमात् ।। ९४

पूर्वे चाष्टौ चतुः षष्टिरन्ने शृणुष्व तद्यथा ।।
स्थूलता ह्रस्वता बाल्यं वार्धक्यं यौवनं तथा ।। ९५

नाना जाति स्वरूपं च चतुर्भिर्देह धारणम् ।।
पार्थिवांश विना नित्यमष्टौ पार्थिव सिद्धयः ।। ९६

विजिते पृथिवीतत्वे यदैशान्ये भवन्ति च ।।
भूमाविव जलेवासौ नातुरोर्णव मापिबेत् ।। ९७

सर्वत्र जलप्राप्तिश्च अपि शुष्कं द्रवं फलम् ।।
त्रिभिर्देहस्य धरणं नदीर्वा स्थापयेत्करे ।। ९८

---

१ अ. समापायांति
२ ब. यक्षौ
३ अ. गांधर्व
४ ब. मिति

अव्रणत्वं शरीरस्य कांतिश्श्चाथाष्टकं स्मृतम् ।।
अष्टौ पूर्वा इमाश्चाष्टौ राक्षसानां पुरस्मृताः ।। ९९

देहादग्निं विनिर्माणं तत्तापभयवर्जनम् ।।
शक्तिदत्वं च लोकानां जलमध्येग्निज्वालनम् ।। १००

अग्निग्रहश्च हस्तेन स्मृतिमात्रेण पावनम् ।।
भस्मीभूतस्य निर्माणं द्वाभ्यां देहस्य धारणम् ।। १०१

पूर्वाः[१] षोडश चाप्यष्टौ तेजसो यक्षसद्मनि ।।
मनोगतित्वं भूतानामन्तर्निवेशनं तथा ।। १०२

पर्वतादि महाभारवहनं लीलयैव च ।।
लघुत्वं गौरवत्वं च पाणिभ्यां वायुवारणम् ।। १०३

अंगुल्य ग्रनिपातेन भूमेः सर्वत्र कम्पनम् ।।
एकेन देहनिष्पति गांधर्व वांति सिद्धयः ।। १०४

चतुर्विंशतिः पूर्वाश्चाप्यष्टावेताश्च सिद्धयः ।।
[२]गन्धर्वलोके द्वात्रिंशदत्त ऊर्ध्वं निशामय[३] ।। १०५

---

१ ब. पूर्वौ

२ अ. गांधर्व

३ अ. निशामयः ।। ब. निशामये ।।

छायाविहीन[1]निष्पत्तिरिंद्रियाणामदर्शनम् ।।
आकाशगमनं नित्यमिंद्रिया दिशमः स्वयम् ।। १०६

दूरे च[2] शब्दग्रहणं सर्व शब्दावगाहनम् ।।
तन्मात्र लिंगग्रहणं सर्व प्राणिनिदर्शनम् ।। १०७

अष्टौ वातात्मिकाश्चैन्द्रे द्वात्रिंशदपि पूर्वकाः ।।
यथाकामोपलब्धिश्च यथा काम विनिर्गमः[3] ।। १०८

सर्वत्राभि भवश्चैव सर्वगुह्य निदर्शनम् ।।
संसारदर्शनं चापि मानस्योऽष्टौ च सिद्धयः ।। १०९

चत्वारिंशच्च पूर्वाश्च सौमलोके स्मृतास्त्विमाः ।।
छेदनं तापनं बन्धः संसार परिवर्तनम् ।। ११०

सर्वभूत प्रसादत्वं मृत्युकालजयस्तथा ।।
अहंकारोद्भवाश्चाष्टौ प्राजापत्ये च पूर्विकाः ।। १११

आकारेण[4] जगत्सृष्टिस्तथानुग्रह एव च ।।
प्रलयस्याधिकारं च लोकचित्र प्रवर्तनम् ।। ११२

---

१ अ. 'इच्छाविहित'
२ 'च' प्रतौ नास्ति ।
३ अ. विनिर्गमम्
४ 'अकारेण' अ. ब. पाठः ।

असादश्यमिदं[1] व्यक्तं निर्वाणं च पृथक्पृथक् ।।
शुभेतरस्य कर्तृत्वमष्टौ बुद्धिभवास्त्वमी ।। ११३

षट्चाशत्तथा पूर्वश्चैतुः षष्टिरिमे गुणाः ।।
ब्राह्मये पदे प्रवर्तंते गुह्यमेतत्तवेरितम् ।। ११४

जीवतो देहभेदे वा सिद्धयश्चैतास्तु योगिनाम्[2] ।।
संगो नैव विधातव्यो भयात्पतन संभवात् ।। ११५

एतान्गुणान्निराकृत्य मुजंतो योगिनस्तदा[3] ।।
सिद्धयो/ष्टौ प्रवर्तंते योगसंसिद्धि कारकाः ।। ११६

अणिमालधिमा चैव महिमा प्राप्तिरेव च ।।
[4]प्राकाम्यं च तथेशित्वं वशित्वं च तथापरे[5] ।। ११७

यत्र कामावसायित्वं माहेश्वरपद स्थिताः[6] ।।
सूक्ष्मात्सूक्ष्मत्वमणिमा शीघ्रत्वाल्लधिमा स्मृता ।। ११८

महिमा शेषपूज्यत्वात्प्राप्तिर्ना प्राप्यमस्ययत् ।।
प्राकाम्यमस्य व्यापित्वादीशि त्वं चेश्वरो यतः ।। ११९

---

१ ब. 'प्रसादम्यामिदं'
२ अ. योगिना
३ अ. 'यागिनः सदा'।।
४ अ. 'प्र'
५ अ. ब. परं
६ ब. स्थित

वशित्वाद्वशिता नाम सप्तमी सिद्धिरुत्तमा ।।
यत्रेच्छा तत्र च स्थानं तत्र कामावसायिता ।। १२०

ऐश्वरं पदमाप्तस्य भवंत्येताश्च सिद्धयः ।।
ततो न जायते नैव वर्धते न विनश्यति ।। १२१

*[1]एष मुक्त इति प्रोक्तो य एवं मुक्तिमाप्नुयात् ।।
यथा जलं जलेनैक्यं निक्षिप्तमुपगच्छति ।। १२२

तथैव सात्म्यमभ्येति योगिनामात्मा परात्मना ।।
एवं ज्ञात्वा फलं योगी सदा योगं समभ्यसेत् ।। १२३

अत्रोपमां व्याहरंति योगार्थं योगिनोऽमलाः ।।
शशांकरश्मि संयोगादर्ककांतो हुताशनम् ।। १२४

समुत्सृजति नैकः सन्नुपमा सास्ति योगिनः ।।
कपिंजलाखुनकुला वसंति स्वामिवद्गृहे ।। १२५

ध्वस्ते यांत्यन्यतो दुःखं न तेषां सोपमायतेः ।।
मृदेहकल्पदेहोऽपि[2] मुखाग्रेण कनीयसा ।। १२६

---

*१ अ. Folio No.322 of the M.S.-A- is missing, so, slokas from 122 to 141 are missing.

(एष मुक्त....... गच्छति ।। १२२)

( स्थानं..........प्रजायते ।। १४१ )

२ ब. 'मदेहि काल्प देहापि' इति स्यात् ।

करोति मृदुमागचयमुपदेशः स योगिनः ।।
पशुपक्षिमनुष्याधैः पत्रपुष्पफला न्वितम् ।। १२७

वृक्षं विलुप्यमानं च लब्ध्वा सिध्यंति योगिनः ।।
रुरुगात्र विषाणाग्रमालक्ष्य तिलका कृतिम् ।। १२८

सह तेन विवर्धेत योगी सिद्धिमुपाश्नुते ।।
द्रव्यं पूर्णमुपादाय पात्र मारोहते भुवः ।। १२९

तुंगमार्गं विलोकयेवं विज्ञातं किं न योगिनाम् ।।
तद्गेहं यत्र वसति तद्भोज्यं येन जीवति[१] ।। १३०

येन निष्पाद्यते चार्थः स्वयं स्याद्योग सिद्धये ।।
तथा ज्ञानमुपासीत योगी यत्कार्य साधकम् ।। १३१

ज्ञानानां बहुता येयं योगविघ्नकरी हि सा ।।
इदं ज्ञेयमिदं ज्ञेय मिति वस्तुषितश्चरेत् ।। १३२

अपिकल्पसहस्त्रायुर्नैव ज्ञेयमवाप्नुयात् ।।
त्यक्तसंगो जितक्रोधो लब्धाहारो जितेंद्रियः ।। १३३

---

१ ब. जीव्यते

पिधाय[१] बुद्धया द्वाराणि मनोध्याने निवेशयेत ।।
आहारं सात्त्विकं सेवेन्नऽतं येन विचेतनः ।। १३४

स्यादयं तं च भुंजानो रौरवस्य प्रियातिथिः ।।
वाग्दण्डः कर्मदण्डश्च मनोदंडश्च ते त्रयः ।। १३५

यस्यै ते नियता दंडाः स त्रिदंडी यतिः स्मृतः ।।
अनुरागं जनो याति परोक्षे गुणकीर्तनम् ।। १३६

न बिभ्यति च सत्त्वानि सिद्धेर्लक्षण मुच्यते ।। १३७

अलौल्यमारोग्यमनिष्ठुरत्वं गंधः शुभो मूत्रपुरीषयोश्च ।।
कांतिः प्रसादः स्वरसौम्यता च योगप्रवृतेः प्रथमं हि चिह्नम् ।। १३८

समाहितो ब्रह्मपरो प्रमादी शुचिस्तथैकांत रति जितेन्द्रियः ।।
समाप्नुयोगमिमं महामना विमुक्तिमाप्नोति ततश्च योगतः[२] ।। १३९

कुलं पवित्रं जननी कृतार्था वसुन्धरा भाग्यवती[३] च तेन ।।
अब्राह्यऽमार्गे सुख सिन्धुमग्नं लग्नं परे ब्रह्मणि यस्य चेतः ।। १४०

---

१ ब. पिधाय
२ ब. यनैमः
३ ब. भाग्यमती

विशुद्ध बुद्धिः समलोष्टकांचनः समस्त भूतेषु वसन्समो हि यः।। १४१

इदं मया योग रहस्य मुक्तविधं विधं गौतमः प्रापयोगन् ।।
तेनैतच्च स्थापितं पार्थ लिंगं संदर्शनादर्चनात्कल्मषघ्नम् ।। १४२

यश्चाश्विने कृष्ण चतुर्दशी दिने रात्री समभ्यर्चति लिंगमेतन् ।।
स्नात्वा अहल्या सरसि[2] प्रधाने श्रद्धाय[3] सर्वं प्रविधाय भक्तितः ।। १४३

महोपकारेण विमुक्तपापः स याति यत्रास्ति स गौतमो मुनिः।। १४४

इदं मया पार्थ तव प्रणीतं गुप्तस्य क्षेत्रस्य समासयोगात् ।।
माहात्म्यमेतत्सकलं शृणोति यः स स्याद्विशुद्धः किमुवच्मि भूयः ।। १४५

य इदं शृणुयाद्भक्तया गौतमाख्यानमुत्तमम् ।।
पुत्र पौत्रप्रियं प्राप्य स याति पदमव्ययम् ।। १४६

*४ इति श्री स्कांदे..... गौतमेश्वर माहात्म्य सविस्तर योग लक्षण वर्णनं –
– नाम पंचपंचाशत्तमोऽध्यायः ।।

---

१ ब. प्राह

२ ब. अहिल्यासरसि

३ अ. श्रद्धादि

*४ अ. इति श्री स्कंद पुराणे कुमारिका खंडे गौतमेश्वर माहात्म्यं ।।

ब. इति श्री स्कंद पुराणे कु० गौतमेश्वर महात्म्यं सप्तपंचशोऽध्यायः ।।

(According to P.W. It is 55th chapter)